RESEARCH PAPER | Sanskrit | Volume : 5 | Issue : 5 | May 2015 | ISSN - 2249-555X

# आहारे रसप्राधान्यम्

## Aahare RashPradhanyam

KEYWORDS

**Dr. Ranjeet Kumar Tiwary**

Assistant Professor, Sanskrit Department, Women's College, Silchar Shyamaprasad Road, Shillongpatty, Silchar, Cachar, Assam, 788001

उपनिषदि उक्तं यत् पृथिव्या ओषधयः, ओषधिभ्योऽन्नम्, अन्नद्रेतः, रेतसः पुरुषः, स एव वा एष पुरुषोऽन्नरसमयः, एतदुक्तम्। तेन पुरुषो रसमयः, इत्यवगम्यते। तथा च रसमयस्य पुरुषस्य रसे नैव दोषसाम्यं करणीयम्। अतोऽपि रसस्य प्राधान्यं वीर्यविपाकादयोऽपि प्रायशो रसाश्रिता एव।[1]

रसनार्थो रसस्तस्य द्रव्यमापः क्षितिस्तथा।
निवृत्तौ च, विशेषे च प्रत्ययाः स्वादयस्त्रयः।।

रसनायाः ग्राह्य- विषयः रस एव। रसस्य आधारकारणं द्रव्यं जलं पृथिवी च। रसस्य आधेयत्वात् अत्र आधाराधेयत्व भावो जायते। द्वाभ्याम् अतिरिक्तं आकाशादि अपि कारणमिति। यद्यपि रसस्य आधारकारणं जलं पृथिवी च तथापि अभिव्यक्तौ पृथिवी एव मूलकारणम्। जलस्य अव्यक्तत्वात् यदा जलस्य पार्थिवद्रव्यैः सह संपर्को जायते तदा एव रसः व्यक्तो भवति।

वैशेषिकदर्शनेऽपि रसो रसनेन्द्रियग्राह्यः, पृथिव्युदकवृत्तिः, जीवनपुष्टिबलारोग्यनिमित्तं रसनसहकारी मधुराम्ललवणकटुतिक्तकषायभेदभिन्नः। अतः सुश्रुते यद् आप्यो रस इत्युक्तं तदसाधु। न, आपो हि निसर्गेण रसवत्यः, क्षितिस्त्वप्यमेव रसेन नित्यानुसक्तेन रसवतीत्युच्यते। यतो नित्यः क्षितेर्जलसंबन्धः। वचनं हि – विष्टं ह्यपरं परेण इति। तथा चोपनिषादि – तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः। आकाशाद्वायुः। वायोरग्निः। अग्नेरापः। अद्भ्यः पृथिवी। अतः आकाशवाय्वग्निजलक्षितीनामुत्तरोत्तरे भूते पूर्वभूतस्य नित्यमनुप्रवेशः, तत्कृतश्चाकाशादिषु गुणोत्कर्षः।[2]

मधुर- अम्ल- लवण- कटु- तिक्त- कषायश्चेति – षडेते रसाः। यथोक्तञ्च चरकहितायाः सूत्रस्थाने –

स्वादुरम्लोऽथ लवणः कटुकस्तिक्त एव च।
कषायश्चेति शटकोऽयं रसानां संग्रहः स्मृतः।।[3]

अनेके विद्वान्सः क्षारमपि रससमूहे एव परिगणयन्ति किन्तु तद् नोचितम्। महर्षिणा अग्निवेशेन क्षारं रसरूपेण न स्वीकृतमिति। तेनोक्तम्- क्षरणात् क्षारो नासौ रसः। एतेषां रसानां परस्परसंयोगेन रसानां बाहुल्यं समुत्पद्यते।

अपरिसंख्येत्वं पुनस्तेषामाश्रयादीनां भावादीनां भावानां विषेशापरिसंख्येयत्वान्न युक्तम्, ऐकैकोऽपि हि पुनरेषामाश्रयादीनां भावानां विशेषानाश्रयते, न च तस्मादन्यत्वमुपपद्यते, परस्परसंसृष्टभूयिष्ठत्वान्न संसृष्टानां रसानां कर्मोपदिशन्ति बुद्धिमन्तः।[4] अर्थात् द्रव्याणां भेदाः पञ्चमहाभूतानामपेक्षया पृथक् सन्तीति वक्तुं न शक्यते। चेतनाचेतनभेदेन पाञ्चभौतिकद्रव्यमपि द्विविधमिति। चेतनयुक्तद्रव्ये शब्द- स्पर्श- रूप- रस- गन्धाः तथा च अचेतनयुक्तद्रव्ये गुरु- लघु- शीत- उष्ण- स्निग्ध- रूक्ष- मन्द- तीक्ष्ण- स्थिर- सर- मृदु- कठिन- विशद- पिच्छिल- श्लक्ष्ण- सूक्ष्म- स्थूल- सान्द्र- द्रव्याणा गणना गुणरूपेण क्रियते। एतदतिरिक्तं परत्वापरत्वादि गुणाः अपि सन्ति येषां उपयोगः चिकित्साशास्त्रे भवतीति। सुश्रुतसंहितायाम् उक्तमस्ति-

गुणा य उक्ता द्रव्येषु शरीरेष्वपि ते मताः।
स्थानवृद्धिक्षयास्तस्माद्देहिनां द्रव्यहेतुकाः।।[5]

तत्राहारप्रसादाख्यो रसः किटटम् च मलाख्याभिनिवर्तते ; किटटात्मूत्रस्वेदपूरीशवातपित्तश्लेषमाणः कर्णाक्षिनासिकास्यलोमकूपप्रजननमलाः केशशमश्रुलोमनखादयश्चावयवाः पुष्यन्ति, पुष्यन्ति त्वाहाररसात् रसरुधिरमांसमेदोऽस्थिमज्जशुक्रौजान्सि पञ्चेन्द्रियद्रव्याणि धातुप्रसाद्सङ्ज्ञकानि शरीरसन्धिबन्धपिच्छादयश्चावायवा ते सर्व एव धातवो मलाख्याः प्रसादाख्याश्च रसमलाभ्यां पुष्यन्तः स्वं मानंमनुवर्तन्ते यथावयःशरीरम्। एवं रसमलौ स्वप्रमाणावस्थितौ आश्रयस्य समधातोर्धातुसाम्यमनुवर्तयतः निमित्तस्तु क्षीणवृद्धानां प्रसादाख्यानां धातूनां वृद्धिक्षयाभ्यामाहारमूलाभ्यां रसः साम्यमुत्पादयत्यारोग्याय, किटट च मलानामेवमेव। स्वमानातिरिक्ताः पुनरुत्सर्गिणः शीतोष्णपर्ययगुणैश्चोपचर्यमाणा मलाः शरीरधातुसाम्यकाराः समुपलभ्यन्ते। तेषां तु मलप्रसादाख्यानां धातूनां स्रोतांस्ययनमुखानि तानि यथाविभागेन यथास्वं धातूनापूरयन्ति। एवमिदं शरीरमषितपीतलीढस्वादितप्रभवम्, अशितपीतलीढस्वादितप्रभवाश्चास्मिन् व्याधयो प्रभवन्ति ; हितहितोप्रयोगविशेषास्त्वत्र शुभषुभविषेशकरा भवन्तीति। 6 एतादृशं अशितपीतलीढस्वादितैः चतुर्विधैः आहारैः शरीरस्य रचना तथा च अशित्यादि चातुर्विधेन आहारेण अस्मिन् शरीरे व्याधयः समुत्पद्यन्ते। अपथ्याहारेणेव वातपित्तश्लेष्माणः शरीरस्य यथा स्थानविशेषे प्रकुपिता व्याधिविशेषाः अभिनिवर्तन्ते इति।

षड् रसेषु स्वादु-अम्ल-लवणाः वातं प्रशान्तये, कषाय-स्वादु-तिक्तकाः पित्तशमनार्थं तथा च कषाय- कटु- तिक्तरसाः श्लेष्मानाशनार्थम् उपयुक्तं मन्यन्ते वैद्याः। यः रसः यस्य दोषस्य परिहारं न करोति सः रसः दोषं वर्धयति इति ज्ञेयम्। यथोक्तञ्च –

स्वाद्वम्ललवणा वायुं, कषायस्वादुतिक्तकाः।
जयन्ति पित्तं, श्लेष्माणं कषायकटुतिक्तकाः।।[7]

वाग्भटटेनोक्तम् –
तत्राद्या मारुतं घ्नन्ति त्र्यस्तित्तकादयः।
कषायतिक्तमधुराः पित्तमन्ये तु कुर्वते।।

चत्वारो रोगाः भवन्ति – आगन्तुवात्पित्त्श्लेष्मनिमित्ताः तेषां चातुर्णामपि रोगाणां रोगत्वमेकविधं, रुक्सामान्यात्। द्विधा पुनः प्रकृतिरेषां आगन्तुनिजविभागात्। विकाराः पुनरेषामपरिसंख्येयाःप्रकृत्यधिष्ठानलिङ्गायतनविकल्पविशेषात्, तेषामपरिसन्ख्येयत्वात्।

तेषां त्रयाणामपि दोषाणां स्थानविभागाः सन्ति – वायोः स्थानं बस्तिः, पुरीषाधानं, कटिः, सक्थिनी, पादावस्थिनी च। पक्वाशय एव वात्स्थानमिति। सुश्रुतेणाप्युक्तम्- पक्वाधानगुदालयः। तत्र समासेन श्रोणिगुदसंश्रयः। तत्र विकारः द्विधः – सामान्यजा नानात्मजाश्च। नानात्मजाः अशीतिर्वातविकाराः तद्यथा- नखभेदः, विपादिका, पादशूलं, पादभ्रन्शः, पादसुप्तता, वात्खुडडता, गुल्फ़ग्रहः, पिण्डिकोद्वेष्टनं, गृध्रसो, जानुभेदः, जानुविश्लेषः, गुदभ्रन्शः, गुदार्ति, वृष्णोत्क्षेप, शेपःस्तम्भः, वङ्क्षणानाहः, श्रोणिभेदः, विडभेदः, उदावर्तः, खञ्जत्वं, वामनत्वं, त्रिकग्रः, पृष्ठग्रहः, पार्श्वावमर्दः, उदरावेष्टः, हृन्मोहः, हृद्द्रवः, वक्षौद्धर्षः, वक्षुपरोधः, बाहुशोषः, ग्रीवास्तंभः, मन्यास्तंभः, कन्ठोध्वन्सः, हनुस्तम्भः, ओष्ठभेदः, दन्तभेदः, दन्तशैथिल्यं, मूकत्वं, वाक्सङ्गः, कषायास्यता, मुखशोषः, अरसग्यता, कर्णशूलः, अशब्दश्रवणः, उच्चैः श्रुतिः च, बाधिर्यं, वर्तस्तम्भः, वर्त्मसन्को, तिमिरं, अक्षिव्युदासः, भ्रून्व्युदासः, शङ्खभेदः, ललाटभेदः, शिरारुक्, केशभूमिस्फुटनम्, अर्दितं, एकाङ्गरोगः, सर्वाङ्गरोगः, आक्षेपकः, दण्डकः, श्रमः, भ्रमः, वेपथुः, जम्भा, विषादः, अतिप्रलापः, ग्लानिः, रौक्ष्यः, पारुष्यं, श्यावारुणावभासता, अनिद्रा, अनवस्थितत्वं चेति। एतदतिरिक्तमपि अनेके वातरोगाः सन्ति। तत्र वातविकारेषु वायोः वक्ष्यमाणं स्वकीयं लक्षणं भवति।

Volume : 5 | Issue : 5 | May 2015 | ISSN - 2249-555X

उपचारविषये सुश्रुतसंहितायाः चिकित्सास्थाने उक्तमस्ति-

वीर्येण वस्तिरादत्ते दोषानापादमस्तकात्।
पक्वाशयस्थोऽम्बरगो भूमिरेको रसानिव।।
स कटी पृष्ठकोष्ठस्थान वीर्येणालोडथ सञ्चयान्।
उत्खातमूलान् हरति दोषाणां साधु योजितः।।
दोषत्रयस्य यस्माच्च प्रकोपे वायुरीश्वरः।
तस्मात्तस्यातिवृद्धस्य शरीरमभिनिघ्नतः।।
वायोर्विषहते वेगं नान्या बस्तेः ऋते क्रिया।
पवनाविद्धतोयस्य वेला वेगमिवोदधेः ।।

चरकसंहितानुसारम्, वातविकारस्य सामान्यचिकित्सा मधुराम्ललवण-स्निग्धोष्णैरुपक्रमैरुप्क्रमेत स्नेह- स्वेदास्थापन- नस्य- भोजन- अभ्यङ्ग- उत्सादन-परिषेकादि-उपक्रमैः करणीया।

पित्तविकाराश्चत्वारिन्शत् इति तद्यथा – ओषः , प्लोषः , दाहः , धूमकः , अम्लकः, विदाहः, अन्तर्दाहः, ऊष्माधिक्यः, अतिस्वेदः, अङ्गगन्धः, अन्गावदरणं, शोणितक्लेदः, मांसक्लेदः, त्वग्दाहः, मान्सदाहः, त्वगवदरणं, चर्मावदरणं, रक्तकोठाः, रक्तपित्तम्, रक्तमण्डलं, हरितत्वं, हारिद्रत्वं, नीलिका, कक्षा, कामला, तिक्तास्यता, पूतिमुखता, तृष्णाया आधिक्यम्, अतृप्तिः , आस्यपाक, गलपा, अक्षिपाक, गुदपाक, मेध्रपाक, जीवादान, तमःप्रवेशः, हरितहारिद्र- मूत्रनेत्रवर्चस्त्वं चेति। महर्षिसुश्रुतेन प्रोक्तम् –

पीतं तीक्ष्णं द्रवं पूति नीलं पीतं तथैव च।
उष्णं कटु सरं चैव विदग्धं चाम्लमेव च ।।

पित्तविकाराणां सामान्यचिकित्सा तं मधुर- तिक्त- कषाय- शीतैरुपक्रमेण स्नेह- विरेचन- प्रदेह- परिषेक- अभ्यङ्ग- अवगाह- प्रभृतिपित्तहरविधिद्वारा मात्रा-कालादीनां विवेचनपुरःसरं आयुर्वेदे संपाद्यते।

विंशत्यात्मकसन्ख्यकाः श्लेष्माविकाराः – तृप्तिः , तन्द्रा, निद्राधिक्यं, स्तैमित्यं, गुरुगात्रता, आलस्यं, मुखमाधुर्यं, मुखस्त्रावः , श्लेष्मोद्गिरणं, मलस्याधिक्यं, कण्ठोपलेपः , बलासः, हृदयोपलेपनं, धमनीप्रतिचयः, गलगन्डः , अतिस्थौल्यं, शीताग्निता, उदर्दः, श्वेतावभासता, श्वेतमूत्रनेत्रवर्चस्त्वं चेति। चरकसंहितायाः सूत्रस्थाने श्लेष्मविकारानामुपचारविषये उल्लिखितम् – सर्वेष्वपि तु खल्वेतेषु श्लेष्मविकारमेवाध्यवस्यन्ति कुशलाः, तद्यथा- श्वैत्यशैत्यस्नेहगौरवमाधुर्यमात्सर्याणि श्लेस्मण आत्मरुपाणि, एवंविधत्वाच्च कर्मणः स्व- लक्षणमिदमस्य भवति तं तं शरीरावयवमाविशतः। पुनश्च, उक्तम् – तं कटुकतिक्तकषायतीक्ष्णोष्णोष्णरूक्शैरुपक्रमेत स्वेदन- वमन- शिरोविरेचन-व्यायामादिभिः श्लेष्महरैर्मात्रा कालं च प्रमाणीकृत्य ; वमनं तु सर्वोपक्रमेभ्यः श्लेष्मणि प्रधानतमं मन्यन्ते भिषजः, तद्ध्यादित एवामाशयमनुप्रविश्य केवलं वैकारिकं श्लेष्ममूलमपकर्षयति, तत्रावजिते श्लेष्मण्यपि शरीरान्तर्गताः श्लेष्मविकाराः प्रशान्तिमापद्यन्ते, यथा – भिन्ने केदारसेतौ शालीयवषष्टिकादीन्यनभिष्यन्दमानान्यम्भसा प्रशोषमापाद्यन्ते तद्विति। 8 रसदोषजविकाराः भवन्ति – अश्रद्धया अनिच्छया च भोजनम्, अरुचि- सुखरसे विकृतिश्च। मधुरादिरसानाम् अज्ञानं, तन्द्रा, ज्वरः , पाण्डुत्वं, क्लैब्यं, भयं, शिथिलतादयश्च प्रमुखाः इति। अतएव आहार- शुद्धि द्वारा एव शरीर- शुद्धि तथा शरीरे निरामयता अपि जायते। आहारनियन्त्रणेन रोगी यथाशीघ्रं स्वस्थ भवति। यथा अन्नरसः तथा मनस् इति प्रसिद्धमेव। अन्नं बल-वीर्यं च वर्द्धयति, नवचैतन्यं, ऊर्जा च यच्छति। अन्नमेव भूतानां मूलमिति गीतायाम् उक्तं भगवता श्रीकृष्णेन –

अन्नाद्भवन्ति भूतानि पर्जन्यादन्नसम्भवः।
यज्ञाद्भवति पर्जन्यो यज्ञः कर्मसमुद्भवः।।[9]

**REFERENCE**

1. विद्यालन्कार जयदेव, (अनु.) चरकसंहिता, पूर्वो भागः, मोतीलाल बनारसी दास, दिल्ली,1975, पृ. सं. – 17 | 2. तत्रैव, पृ. सं. – 1/17 | 3. चरकसंहिता, सूत्रस्थानम्, 64 | 4. चरकसंहिता, सूत्र., 26/24 | 5. तत्रैव, 26/ 41 | 6. तत्रैव, 28/3 | 7. तत्रैव, 26/ 65 | 8. तत्रैव, च.सू. 20/18 | 9. श्रीमद्भगवद्गीता, 3/14